तद्वाऽस्य गमनं तावन्निर्णीतं च सहेतुकम् ।
उपपत्तिनिमित्तं वा न तावत् प्रथमक्रमः ॥ ५४ ॥
यथेष्टकल्पनापत्तेर्द्वितीयः कल्प एव चेत् ।
पातमन्दोच्चमध्ये न फलं साध्यं न तन्मतम् ॥ ५५ ॥
कल्पस्तृतीयस्तद्दुर्घैर्नोपलक्ष्ट उपपत्तिः ॥
अश्वेनेव रथं पातमाकर्षति न वा सताम् ॥ ५६ ॥
स्तम्भच्छायादीपवच्चेन्न मन्दोच्चोऽत्र कारणम् ।
परस्परभचक्रार्धपातोपपत्तिसञ्चरः ॥ ५७ ॥
वामं निष्कारणं पातीनीयं वा कल्पना सती ।
स्वोच्चादुपपत्तिद्वाऽपि नाकाङ्क्षा हि तदिष्यते ॥ ५८ ॥
सहेतुकं कल्प्यमानं कल्प्यते न तु हेतुकैः ।
मन्दोच्चेनापकृष्टस्तु यावद्व्रजति भास्करः ॥ ५९ ॥
तेनाकृष्टा ग्रहास्तावत् ते तथोपपत्तिहैर्ययुः ।
भृत्यैस्तत् क्रियते कार्यं स्वामिना क्रियते हि यत् ॥ ६० ॥
प्रत्यक् प्राग्वद्विरन्त्यवी तदृग्च्चोऽर्कसमं व्रजेत् ।
इति चेन्नैतदिष्टं स्याद्योगादावधिकं नृपाः ॥ ६१ ॥
सेनादावधिकं भृत्या वर्त्तन्ते न हि तत्समाः ।
यावान् यस्याधिकारः स्यात् तावत् तस्य प्रवर्त्तनम् ॥ ६२ ॥
सर्वचक्राधिपः सूर्यः कियद्याति स्वशुक्तितः ।
इयद्यातीति युक्तिः स्याद्राजाऽनुचरकल्पितः ॥ ६३ ॥

Aho ! Shrutgyanam

गतैं कोटिफलज्या तु द्विधा स्यात् तावता हृता ।
कर्णयोर्बहुवृद्धौ तु स्वल्पायां गतिरिटयो
ग्रहदोःफलजा[illegible] यावतोनाधिकं [illegible] ।
यावद्गते गति[illegible] र्णस्तावत्येव न संशयः ॥ १[illegible]२ ॥
तां तु वर्गान्तर[illegible]त् कर्णदोःकोटिज्यां विशोध[illegible] ।
क्षीयमाणे वर्द्धमाने भूभायां तद्द्वये धनम् ॥ १३३ ॥
कुर्याद्यथोक्तनिष्पन्नकर्णा[illegible] यथा तथा ।
वर्द्धते क्षीयते चापि ग्रगात् कोटिफलेन च ॥ १३४ ॥
कर्क्यादिकेन्द्रे तद्व्यस्तं चलकर्णस्तथा कृतः ।
कर्णेकच्चागते कोटिफले मोक्षो मन्हामुने ॥ १३५ ॥
छेदोऽसौ द्विगुणस्तेन स्वच्छेदाप्तफलेन च ।
दोःफलानगुणश्चन्द्रोः स्वकादूनाधिको भवेत् ॥ १[illegible]६ ॥
स्थिरीकर्मफलेनैव कर्णः कल्प्यः स्फुटः कृतः ।
गत्यर्थं चलकर्णं स्यात् त्रिज्यादोःफलजावधे ॥ १३७ ॥
ग्रहबाहुफलज्या तु कर्णान्तरहृता तथा ।
स्वमूलाधिककर्णेन ग्रहकर्णविवा[illegible]णा ॥ १३८ ॥
ऊनाधिकगुणा तादृक् फलं यत्तच्छि[illegible]ऽन्यथा ।
स्वकाभ्यां हृतकर्णाभ्यां ग्रहात् [illegible]द्धात् ग्रहं मुने ॥ १३९ ॥
तत्पूर्वकालिके हित्वा भुक्तौ सत्यां गते फलम् ।
तादृक् स्यादिति संस्कारो हृतात् कर्णा[illegible]धिकः ॥ १४० ॥
निष्पन्नराशेः कर्णे न गते दोःफलमौर्विका ।

Aho ! Shrutgyanam

एकादश्यां तु कृष्णायां शुक्रार्कदिवसे गृही ॥ ८८ ॥
न पारणं नोपवासं कुर्यात् पाते च मन्मतम् ।
एकादशीव्रतस्यैवं लक्षयित्वा यथोचितम् ॥ ८९ ॥
नामभिस्त्रिभिरुक्तैश्च कथान्ते सफलं व्रती ।
उक्तदोषेषु चानुक्तवेधेषु व्रतमाचरेत् ॥ ९० ॥
व्रतं तत्पारणं तस्याकृतिथिसंख्यानि हन्ति च ।
तेषु नक्तं हविष्यान्नमन्नोदनफले तिलम् ॥ ९१ ॥
क्षीरान्नाद्यं पञ्चगव्यं प्राणायामचयं क्रमात् ।
एवं यदैव वा गच्छेदुत्तरोत्तरमुत्तमम् ॥ ९२ ॥
व्रतभङ्गो हि नैवं चेद्व्रतं नैक उपस्थिते ।
अन्यं कुर्वीत दानर्चाहोमैरन्यं च वर्जयेत् ॥ ९३ ॥
वानप्रस्थो ब्रह्मचारी मुमुक्षुर्यतिरित्यपि ।
वार्च्यः सर्वाश्रमस्थोऽपि वा कुर्वन् नित्यव्रतं मुने ॥ ९४ ॥
न तस्य सन्त्यक्तदोषो यत्तद्द्रव्यं च नोचितम् ।
परविद्धाऽपि सा कार्या नारदैकादशी तिथिः ॥ ९५ ॥
पूर्वविद्धाऽपि सा ग्राह्या परतो द्वादशी न चेत् ।
शुद्धाऽधिका विद्धसमा चोत्तराऽनधिका यदि ॥ ९६ ॥
पूर्वा पुण्या गृहस्थानां यतीनामुत्तरा स्मृता ।
इद्धाधिकोत्तरा हीना व्यत्ययेयं यदीष्यते ॥ ९७ ॥
उत्तराऽनुत्कृष्टा सा सर्वेषामुत्तरैव चेत् ।
शुद्धहीना शुद्धसमा विद्धहीना च नारद ॥ ९८ ॥

Aho ! Shrutgyanam

